गोधूमचूर्णं, क्ली, ( गोधूमस्य चूर्णम् । ) चूर्णीकृत-गोधूमः । मयदा इति भाषा ॥ यथा,—
"शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाश्च रोटिकाम् ॥"
इति भावप्रकाशः ॥

गोधूमसम्भवं, क्ली, ( सम्भवत्यस्मादिति सम्भव उत्पत्तिस्थानम् । गोधूमः सम्भवोऽस्य । ) सौवीरम् । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

गोधूमसारः, पुं, गोधूमस्य सारभागः । पालो इति भाषा ॥ तत्करणविधिर्यथा । "निस्तुषगोधूमं उदूखले कण्डयित्वा सन्ध्याकाले मृत्तिकादिपात्रे जले मग्नं कारयित्वा परदिने प्रभाते उपरिस्थजलं क्रमेण दूरीकृत्य नीचस्थसारं रौद्रे शुष्कं कृत्वा पात्रान्तरे स्थापयेत् ।" इति पाकराजेश्वरः ॥

गोधूमी, स्त्री, ( गां धूमयतीति । धूमि+अण् । गौरादित्वात् ङीष् । ) गोलोमिका । इति राजनिर्घण्टः ॥ ( गोलोमिकाशब्देऽस्या विवरणं ज्ञेयम् ॥ )

गोधूलिः, स्त्री, ( गवां खुरोत्थिता धूलिर्यत्र काले । ) कालविशेषः । गोधूलिकालस्तु त्रिविधः । यथा, ग्रीष्मे अर्द्धास्तरविकालः । हेमन्तशिशिरयोर्मृदुताप्राप्तपिण्डीकृतरविकालः । वर्षाशरद्वसन्तेष्वस्तगतरविकालः । यथा,—
"गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके
हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे ।
ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौ गतेऽदृश्यतां
सूर्य्ये चास्तमुपागते च नियतं वर्षाशरत्कालयोः ॥"
इति दीपिका ॥

गोधेनुः, स्त्री, ( गौरेव धेनुः । ) दुग्धवती गवी । इति संक्षिप्तसारव्याकरणम् ॥

गोधेरः, पुं, ( गोधति धातूनामनेकार्थत्वात् रक्षतीति । गुध्+बाहुलकादेरक् । ) गोधा । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोनन्दी, स्त्री, (गवि जले नन्दतीति । नन्द+अच् । गौरादित्वात् ङीष् । ) सारसपक्षिणी । इति हारावली ॥

गोनर्द्दं, क्ली, (गवि पृथिव्यां नर्द्दते स्वनाम्ना आख्यायते इत्यर्थः । नर्द्द+अप् । ) मुस्तकम् । इति मेदिनी । दे । २८ ॥

गोनर्द्दः, पुं, (गवि जले नर्द्दति कूजतीति । गो+नर्द्द+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति पचादित्वादच् । ) सारसपक्षी । इति मेदिनी । दे । २८ ॥ (गोभिर्वाग्भिर्नर्द्दतीति । अच् ।) देशविशेषः । यथा, वृहत्संहितायाम् । १४ । १२ ।
"कङ्कटटङ्कणवनवासि-
शिविकफणिकारकोङ्कणाभीराः ।
आकरवेणावन्तक-
दशपुरगोनर्द्दकेरलकाः ॥"

गोनर्द्दस्य देशस्य राजा । "तदाजेऽपि ।" २ । ४ । ६२ । इत्यण् । गोनर्द्दराजः । यथा, राजतरङ्गिण्याम् । १ । ५७ ।
"काश्मीरेन्द्रः स गोनर्द्दो वेल्लद्गङ्गादुकूलया ।
दिशा कैलासहासिन्या प्रतापी पर्य्युपास्यत ॥")

गोनर्द्दीयः, पुं, ( गोनर्द्दे देशे भवः । गोनर्द्द+"एङ् प्राचां देशे ।" १ । १ । ७५ । इति वृद्धसंज्ञत्वात् छः । ) पतञ्जलिमुनिः । इति हेमचन्द्रः । ३ । ५१५ ॥ ( अस्य गोनर्द्ददेशोद्भूतत्वात् तथात्वम् । तद्देशभवे, त्रि ॥ )

गोनसः, पुं, (गोरिव नासिका यस्य । "अच् नासिकायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् नसादेशश्च । ) सर्पविशेषः । बोड़ा इति ख्यात इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । तिलित्सः २ । इत्यमरः । १ । ८ । ४ ॥ गोनासः ३ घोनसः ४ । इति हेमचन्द्रः ॥ मण्डलीबोड़ः ५ । इति विक्रमादित्यः ॥ बोड़ः ६ । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"सिलिन्दको गोनसो वृद्धगोनसः पनसी ॥" )
वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनाथः, पुं, ( गवां नाथः । ) अनड्वान् । इति राजनिर्घण्टः ॥

गोनासं, क्ली, ( गोर्नासा इव आकृतिर्यस्य । गोनसाकारत्वादस्य तथात्वम् । ) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनासः, पुं, ( गोर्नासा इव नासा यस्य । ) गोनससर्पः । इति हेमचन्द्रः । ४ । ३७२ ॥

गोनिष्यन्दः, पुं, ( गोर्निष्यन्दते क्षरतीति । नि+स्यन्द+पचाद्यच् । यद्वा गवां निष्यन्दः । "हृद्विष्टिते भावो द्रववत् प्रकाशते ।" इति न्यायात् । ) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोपः, पुं, ( गोर्जलात् कफपित्तादिदूषितरसात् पाति रक्षतीति । गो+पा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ) बोलः । ( गां गोजातिं पाति रक्षतीति । गो+पा+कः । ) जातिविशेषः । गोयाला इति भाषा ॥ तत्पर्य्यायः । गोसंख्यः २ गोधुक् ३ आभीरः ४ वल्लवः ५ गोपालः ६ । इत्यमरः । २ । ६ । ५७ ॥ तस्योत्पत्तिर्यथा,—
"मणिबन्ध्यां तन्तुवायात् गोपजातेश्च सम्भवः ।"
इति पराशरपद्धतिः ॥
( यथा, मनुः । ८ । २६० ।
"व्याधाञ्छाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥" )
गोत्राध्यक्षः । ( गां पृथिवीं पाति रक्षतीति । पा+कः । ) पृथ्वीपतिः । बहुग्रामस्याधिकृतः । इति मेदिनी । पे । ५ ॥ (गाः पाति रक्षतीति । पा+कः । गोरक्षकः । यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पाले भृते भृतिः ॥"

गन्धर्व्वविशेषः । यथा, रामायणे । २ । ९१ । ४६ ।
"नारदस्तुम्बुरुर्गोपः प्रभया सूर्य्यवर्च्चसः ।
एते गन्धर्व्वराजानो भरतस्याग्रतो जगुः ॥" )

गोपः, त्रि, ( गोपायति रक्षतीति । गुपू ण् रक्षणे गुप+आय+"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति अच् । ) रक्षकः । उपकारकः । इति शब्दरत्नावली ॥ ( यथा, ऋग्वेदे । १० । ६१ । १० । "द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥" )

गोपकः, पुं, (गोप+स्वार्थे कन् । ) बोलः । बहुग्रामाधिपतिः । इति शब्दरत्नावली ॥

गोपकन्या, स्त्री, (इन्द्रियाद्युपलक्षितशरीररक्षकस्य गोपस्य वैद्यस्य कन्येव हितकारित्वात् ।) शारिवौषधिः । इति राजनिर्घण्टः ॥ ( गोपस्य कन्या । ) आभीरसुता ॥ ( यथा,—
"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् ।
कैशोरकं मानयन् वै सह ताभिर्मुमोद ह ॥"
इति हरिवंशे । ७६ । १८ ॥ )

गोपघोण्टा, स्त्री, (गोपप्रिया घोण्टा वदरीविशेषः ।) हस्तिकोलिः । इति रत्नमाला ॥ वदरीसदृशसूक्ष्मफलवृक्षः । शेयाकुल इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
( "वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् ।
अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते ॥")
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

गोपतिः, पुं (गोर्वृषभस्य पतिः । यद्वा गवां पशूनां जीवानां पतिः ।) शिवः । ( यथा, महाभारते । १३ । १७ । १३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥"
गां पृथ्वीं जगदित्यर्थः पाति पालयतीति । गो+पा+डतिः । विष्णुः । यथा, महाभारते । १३ । १४९ । ६६ ।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥"
गोपेन्द्रनन्दनकृष्णः । यथा, हरिवंशे । ७६ । ४ ।
"अमानुषाणि कर्म्माणि पश्यामस्तव गोपते ! ॥"
असुरभेदः । यथा, महाभारते । ३ । १२ । ३५ ।
"गोपतिस्तालकेतुश्च त्वया विनिहतावुभौ ॥"
गवां रश्मीनां पतिः । ) सूर्य्यः । ( यथा, भागवते । १ । १२ । १० ।
"परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥"
गोः पृथिव्याः पतिः । ) राजा । ( गवां सौरभेयाणां पतिः । ) वृषः । इति मेदिनी ॥ ते । १०७ ॥ (यथा, वृहत्संहितायाम् । ९८ । ११५ ।
"शार्द्दूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।
येषाञ्च शब्दरहितं स्तिमितं च यातं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥" )
ऋषभनामौषधः । इति राजनिर्घण्टः ॥

गोपदलः, पुं, ( गोपदं गोचरणन्यासयोग्यं स्थानं लाति गृह्णातीति । गोपद+ला+कः ।) गुवाकः । इति त्रिकाण्डशेषः ॥